International Journal of Sanskrit Research 2023; 9(3): 234-237

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(3): 234-237
© 2023 IJSR
www.anantaajournal.com
Received: 28-03-2023
Accepted: 30-04-2023

**Dr. Vairamuthu K**
SRF, NIIMH, Hyderabad, Telangana, India

**KJ Niranjana**
Professor, Dept. Of Samhita & Siddhantha, Santhigiri Ayurveda Medical College, Palakkad, Kerala, India

**Corresponding Author:**
**Dr. Vairamuthu K**
SRF, NIIMH, Hyderabad, Telangana, India

# वातव्याधि चिकित्सायां आमपाचनस्य प्राधान्यम्

**Dr. Vairamuthu K and KJ Niranjana**

**सारांश**

इदानीं तन साहचर्ये अस्माकं जीवितचर्यायां नानविध परिवर्तनानि दृश्यन्ते । तत्विषयं आयुर्वेदरीत्या अवलोकनं कुर्म:। "आरोग्यार्थं मूलकारणं अग्नि: एव" इति आयुर्वेदे प्रदिपादितम् । शरीरस्य निर्माणार्थं, संरक्षणार्थं तादृशमेव नाशार्थं अपि मूलकारणं अग्नि: एव । अधिकतया अग्ने: वैषम्यमेव रोगाणां कारणम् । मन्दाग्नि, विषमाग्नि, तीक्ष्णाग्नि एते अग्निवैषम्यस्य भेदा: इति आयुर्वेदे सूचितम् । यदा मन्दाग्नि: विशेषतया स्तम्भनावस्थायां भवति तदा आमोत्पत्ति: भवति । अधुना जनेषु दृश्यमान रूक्ष, लघु आहार, शीतलाहार:, अजीर्ण, अभोजन इत्याद्यै: वातकफकर निदानसेवन प्रवणता दृश्यते । आमद्वारा स्रोतसां रोधं कृत्वा धातूनां दुष्टि: तदनन्दरं रोगोत्पत्ति: संभव्यते । वातव्याध्या: चिकित्सा सूत्रे आमपाचन, वातहर आहारविहार सेवनं, शोधनं, धातुवृद्धि: च प्रतिपादितमस्ति । तत्र शोधनात्पूर्वं आमपाचनं करणीयम् । अत: वातव्याधि चिकित्सायां आमपाचन प्राप्त्यर्थं बाह्य, आभ्यन्तर रुक्षणप्रक्रिया नानाविध स्तरा: श्रेष्ठतया उपयुज्यते । आमपाचन द्वारा सम्यक् निराम लक्षणं प्राप्य केवल वातव्याधि चिकित्सा करणीया । अत: आमपाचनस्य यथार्थज्ञानं वातव्याधि चिकित्सायां अत्यन्तं प्रयोजनप्रदं इति मम अभिप्राय: ॥

**कूटशब्द:** अग्नि, आम, आमपाचनम्, वातव्याधि, बाह्यप्रयोग, आभ्यन्तरप्रयोग

## प्रस्तावना

### वायो: प्राधान्यम्

प्रपञ्चे अस्माकम् जीवने अपि वायु: साहचर्यानुसारं नानाविध कर्माणि कुर्वन्ति । अस्माभिः प्रपञ्चे दृश्यमान वायुः क्षेत्रचरः इति नाम्ना ज्ञायते । वायुः पृथ्व्यादि पञ्चमहाभूतं इति वदन्ति। वायुः बलं भवति, शरीर रुप यन्त्रस्य धाता भवति । वायुः आयुः भवति, सर्वप्रपञ्चं वायुमयं इत्यादि कारणेन सर्वेषां प्रभुः इति नाम्ना ज्ञायते । उच्चावचानां चेष्टाणां नियन्ता प्रेरकः इन्द्रियाणां उद्योजकः, इन्द्रियार्थानां अभिवोढा, आयुषः नैरन्तर्यस्य साक्षिरुपेण अपि वायुः वर्तते । वायुः आयुः भवति । तत्विषयं पश्यामः । वातः एव प्राणः, भूतंभव्यं च प्राणे प्रतिष्ठितम् । यावत्कालं शरीरे प्राणः (वायुः) वर्तते तावत्कालपर्यन्तमेव अस्माकं आयुः इति वदामः । शरीरेन्द्रिय सत्वात्मा संयोगः आयुः भवति वायोः कर्माणि विशदतया

वातकलाकलीये प्रतिपादितमस्ति । सर्वरोगाणां हेतु अपि वायुः एव । रोगनिवारणार्थं उपाधि अपि वायुः एव । वायोः प्रवर्त्तन द्वारा कथं मेघाः अन्यत्र गच्छन्ति तादृशं अस्माकं शरीरे विद्यमान वायुः पित्त, कफ, मल धातून् अपि अन्यत्र नीयते । यः शरीरे विद्यमान प्रवर्तमानां दायित्वं स्वमेधया स्वीकृत्य अन्यानि कार्याणि कारयित्वा शरीरे वर्तते सः एव वायुः । वातः एव रोगः अतः तेन जनित व्याधि, वातव्याधि इत्युच्यते । वातेन जनितो व्याधिः वातव्याधि । वातेन उत्भूयमानरोगाः वातव्याधिः इत्यपि वदन्ति । वातव्याधिः द्विधा विभज्यते । सामन्यजं नानात्मजं इति । वातज ज्वर, वातज अतिसार, वातज अर्शः इत्यादयः भवन्ति । नानत्मज वातव्याधि अशीति भवन्ति । आगत्य विकृत वातेन जन्यमान असाधरणो व्याधिः एव वातव्याधिः इति ज्ञायते ।

**भेदा**

**1. गत / स्थित वात**

यस्या अवस्थायां यस्मिन् स्थाने विकृत वात आश्रितः भवति तत्र शारीर रचनया, शारीर क्रियया अपि तत्रत्य कोशानां अवयवानां नाशः, क्षयमपि संभव्यते ।

- कोष्टाश्रित वात
- सर्वांगाश्रित वात
- गुदाश्रित वात
- आमाशयाश्रित वात
- पक्वाशयाश्रित वात
- त्वक् गत वात
- धातुगत वात – रक्तगत, मांसगत, मेदोगत, अस्थिगत, मज्जागत, शुक्रगत
- सिरागत वात
- सन्धिगत वात
- स्नायुगत वात

**2. आवरण**

आवरनः ४२ भेदेषु उक्तमस्ति/ (च.चि. २८)

**3. अन्यभेदा**

- आक्षेपक
- अपतानक
- बहिरायाम
- अर्दित
- मन्यास्तंभ
- गृध्रसि
- क्रोष्टुकशीर्ष
- पंगु
- पाददाह
- आध्मान
- धनुर्वात
- आभ्यन्तरायाम
- पक्षावध
- हनुग्रह
- जिह्वास्तंभ
- विश्वाचि
- खंज वात
- वातकण्टक
- अंसशोष
- कम्पवात
- खल्ली वात

**अग्नेः प्राधान्यम्**

शारीरे विद्यामान आयुः, वर्ण, बलं, स्वास्थ्यं, उत्साह, उपचय, प्रभा, ओजो, तेजसां हेतुः अग्निः एव । अतः अग्निः प्राणः इत्युच्यते । यदा अग्निः शान्ति भवति तदा जीवजालनां मरणं भवेत् । यस्मिन् समये अग्निः स्वकार्यं यथविधि करोति तदा रोगं विना चिरकालं जीवितुं शक्यते । अग्निः यदा विकृतावस्थायं भवेत् तदा मनुष्याः रुग्णाः भवन्ति ।

**Incidence and prevalence**

राष्ट्रस्य विविध स्थानेषु निवसन्त जनेषु अवलोकनं कुर्मः चेत्, द्विसहस्राधिक त्रिंशत् चतुर्नवति जनाः, प्रायशः त्रिंशत् दशलक्ष जनेषु स्नायुगत रोग (neurological disorders) भवन्ति इति दृश्यन्ते ।

**Materials and methods: (उपकरणानि-उपाधयश्च)**

अत्र सूचितं आम, वातव्याधि सम्बन्ध विषया: सर्वमपि माधवनिदानं, चरकसंहित, सुश्रुतसंहित, इत्यादि आयुर्वेद ग्रन्थात् स्वीकृतमस्ति । तथा अन्य वैद्यशास्त्र पुस्तकानि, लेखनानि, अन्तर्जालम् एतेषामपि सदुपयोग: कृतमस्ति ॥

## परिणाम और चर्चा
### वात प्रकोप निदान

| दोष | आहारजं | विहारजं | अन्यजं |
|---|---|---|---|
| वात | रूक्ष,शीत, अल्प,लघु अन्न, आम, अभोजन. | व्यायम, अतिप्रजागर, लङ्घन, प्लवन, अत्याध्व,व्यायाम, विचेष्टा,दिवास्वप्ना, वेगधारण, अभिघात. | दोषासृक् स्रवण, रोगाति कर्षणं,धातु क्षय,मर्माभिघात, क्रोध, भय,शोक. |

(च.चि.२८/१५)

**मन्दाग्निः**

मनुष्याणां बलस्य मूल हेतुः अग्नि एव। मन्दाग्निः, तीक्ष्णाग्निः, विषमाग्निः एते अग्निवैषम्यस्य भेदाः इति आयुर्वेदे सूचितमस्ति। सर्वरोगाणां उत्पत्तेः कारणं मन्दाग्निः एव।

**मन्दाग्नेः निदानम्**

अभोजनं, अजीर्णं, अतिभोजनं, विषमाशनं असात्म्य भोजनं, गुरु आहार, शीत आहार, संदुष्ट भोजनं, विरेचन विभ्रमं, वमन विभ्रमं, स्नेह विभ्रमं, व्याधि कर्षणं, देश वैषम्यं, काल वैषम्यं, ऋतु वैषम्यं, वेगधारणं एते मन्दाग्नेः निदानं भवन्ति। अत्र मन्दाग्नि: इति पदेन जठराग्नि मान्द्यं भूताग्नि मान्द्यम्, धात्वग्निमान्द्यं एते अपि स्वीकरणीयं एव । अत: विविध स्तरेषु विद्यमान अग्नि मान्द्यै: कथं आमोत्पत्ति: सम्भव्यते इति अवलोकनम् कुर्म: ।

**आमोत्पत्तिः तथा प्राधान्यम्**

मनुष्याणां अग्निदोषात् मलवृध्या पृथग्विधा: रोगसंघा: प्रवर्तन्ते। (च.चि.१३।९) आमाशयस्य कयाग्नेः दौर्बल्यात् अविपाचित: आहारस्य य: आद्य धातु: स: आम इति कथ्यते / सर्वरोगाणां मूलहेतु: आम एव / (मधुकोश – माधवनिदानं २५/५). आढकि, चनक,निष्पाव, उद्दालक, गुरुवन्न, शीतान्न,कषयान्न,विष्टिम्भ इत्यादि द्रव्यानां उपयोगेन आम वर्धते ।

**आमस्य लक्षण**

अविपक्कं, असंयुक्तं, दुर्गन्धं, बहुपिच्छिलम्, सर्वगात्राणां सदनं आमं इति कथ्यते । आमदोषं, महाघोरं एव । क्षुत् नाशो, स्रोतोरोधं, अपक्ति, बल भ्रंशम्, गौरवं, अनिलमूढता,निद्रा नाशो, आलस्यं, निष्ठीव, मल सङ्गं, अरुचि, क्लमा एते एव आम लक्षणाः इति वदन्ति ।

**चिकित्सा क्रम**

अल्प दोषेन जनित व्याध्यां लङ्घनेन, मध्ये लङ्गनपाचनेन, प्रभूत दोषेन व्याध्यां शोधनं करणीयम् । ततः पथ्यं आचरणीयम्। (अ. हृ.सू.८/२१).

**आभ्यन्तर आमपाचन प्रयोग**

पञ्चकोल चूर्णं / कषायं, अमृतोत्तर कषायं, षड्धरण चूर्णं इत्यादि औषध योगाणां उपोगः ,केचन व्यायामाः,उत्तर मारुत इत्यादि प्रयोगेन आभ्यन्तर आम पाचनं कर्तुं शक्यते। (अ.हृ. सू. १४/६, ७)

यस्मिन् सन्दर्भे दीपनं, पाचनं, वातहर कर्मं अपि कारणीयं अस्ति तस्मिन् अवसरे अधो दत्त द्रव्याणां उपयोग: अनिवार्य: एव।

| द्रव्य | सामान्य कर्म | दोष कर्म |
|---|---|---|
| भल्लातकम् | दीपन, पाचन | वातहर |
| भाङ्र्गी | दीपन, पाचन | वातहर |
| अपक्व विल्व | दीपन, पाचन | वातहर |
| काश्मरी | दीपन, पाचन | वातहर |
| हरीतकी | दीपन, पाचन | वातहर |
| हिङ्गु | दीपन, पाचन | वातहर |
| श्वेत जीरक | दीपन, पाचन | वातहर |
| कृष्ण जीरक | दीपन, पाचन | वातहर |
| चित्रक | दीपन, पाचन | वातहर |
| कण्डकारी | दीपन, पाचन | वातहर |
| कुपिलु | दीपन, पाचन | वातहर |
| कुटज बीज | दीपन, पाचन | वातहर |
| लवङ्ग | दीपन, पाचन | वातहर |
| मुस्त | दीपन, पाचन | वातहर |
| श्य़ोणाक | दीपन, पाचन | वातहर |
| त्वक् | दीपन, पाचन | वातहर |
| वचा | दीपन, पाचन | वातहर |
| रसोनकल्क | दीपन, पाचन | वातहर |
| शिग्रु त्वक् | दीपन, पाचन | वातहर |
| यवानि | दीपन, पाचन | वातहर |

- बाह्य आमपाचन प्रयोगः (स्तरानुसारं)

1. स्तरः – वालुक स्वेद
2. स्तरः – उद्वर्तनं
3. स्तरः – रुक्ष किलि
4. स्तरः – धान्यम्ल धार

**सम्यक् निराम लक्षणं**

विशद, रुक्ष, निर्विबन्ध, अल्प वेदन, रुचि, पक्ति, बल प्रदं, अगन्धं, क्षुत् प्रवृत्ति इत्यादि लक्षणैः व्याध्यां निराम अवस्था अवगन्तव्यम् ।

**उपसंहारम्**

वातव्याधि इदानिं तन काले सुलभतया दृश्यते । तस्य कारणं अस्माकं जीवितशैली, आहरशैली एव । तारतम्येन धातुक्षयं, आमजन्य वातव्याधि अधिकतया दृश्यते । तादृश आमज वातव्याधि चिकित्सायाः प्रारम्भ घट्टे दोषपाचनम् आमपाचनम् च सम्यक् निराम लक्षण यदा प्राप्यते तावत् पर्यन्तं करणीयम् । ततनन्तरं केवल (निराम) वातव्याधि चिकित्सा कर्तुं सुलभं इति मम अभिप्रायः ।

**संदर्भ सूची**


1. अग्निवेश, चरकसंहित, चक्रपाणि आयुर्वेददीपिक टीका, वैद्य यादवजी त्रिकंजि आचार्य अनुवाद, चिकित्सा स्तान ६ अध्याय, चौकंब ओरियेन्टालिय, वारणाशि; २००९.
2. अग्निवेश, चरकसंहित, चक्रपाणि आयुर्वेददीपिक टीका, वैद्य यादवजी त्रिकंजि आचार्य अनुवाद, चिकित्सा स्तान २७ अध्याय, चौकंब ओरियेन्टालिय, वारणाशि; २००९.
3. अग्निवेश, चरकसंहित, चक्रपाणि आयुर्वेददीपिक टीका, वैद्य यादवजी त्रिकंजि आचार्य अनुवाद, चिकित्सा स्तान १३ अध्याय, चौकंब ओरियेन्टालिय, वारणाशि; २००९.
4. माधवकर, माधवनिदान, के.आर्. क्रिष्णमूर्ति, २५ अध्याय, पुनः मुद्रितम्, चौकंब ओरियेन्टालिय, वारणाशि; २०१२.
5. वाग्भट, अष्टांग हृदय, विद्योतनी टीका, भिषगाचार्य हरिशाश्त्रि परदकर वैद्य, सूत्रस्तान ८ अध्याय, प्रथम मुद्रित, चौकंब ओरियेन्टालिय, वारणाशि; २०१४.
6. वाग्भट, अष्टांग हृदय, विद्योतनी टीका, भिषगाचार्य हरिशाश्त्रि परदकर वैद्य, सूत्रस्तान १४ अध्याय, प्रथम मुद्रित, चौकंब ओरियेन्टालिय, वारणाशि; २०१४.